RNI No. : DELSAN/2011/38660 ISSN 2321 – 4937 DL(E)-21/5379/2011-2013

॥ ओ३म् ॥
न द्वेष्ट्यकुशलं कर्म
कुशले नानुषज्जते।
त्यागी सत्त्वसमाविष्टो
मेधावी छिन्नसंशयः॥
- भ.गी. १८/१०

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत-संवादः

पाक्षिकं वार्तापत्रम्

॥ ओ३म् ॥
नाहं मन्ये सुवेदेति
नो न वेदेति वेद च।
यो नस्तद्वेद तद्वेद नो
न वेदेति वेद च॥
- केनोपनिषद् -२/२

सम्पादकीयकार्यालयः ए-२/३२, वजीराबादमार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com मूल्यम्-रू. ५/-

देहली 卐 वर्षम्-३ अंकः-११-१२ (५९-६०) 卐 १ दिसम्बरमासः २०१३तः ३१ दिसम्बरमासः २०१३ पर्यन्तम् 卐 विक्रमसंवत्-२०७० 卐 सृष्टिसंवत्-१,९६,०८,५३,११३ 卐 पृष्ठम्-८

## चतुर्षु राज्येषु स्थिरसर्वकारः, देहल्याम् अनिश्चितम्

-जीवनशर्मा

**नवदेहली।** पञ्चराज्येषु विधानसभानिर्वाचनान्तरं राजस्थाने, मध्यप्रदेशे, छत्तीसगढे, मिजोरमप्रदेशे च स्थिरसर्वकारो जातः। एतेषु त्रिषु मध्यप्रदेश-राजस्थान-छत्तीसगढप्रदेशेषु भारतीयजनतादलः जयमवाप्नोत्। श्रीशिवराजसिंहचौहानः, श्रीमती वसुन्धरा राजे, श्रीरमनसिंहश्च एते क्रमेण तत्र मुख्यमन्त्रिसिंहासनमलङ्कृतवन्तः। मिजोरमप्रदेशे तु काङ्ग्रेसपक्षतः पी.यू.लालथन्हलवामहाभागः मुख्यमन्त्रित्वेन नियुक्तः।

देहल्यां तु अनिश्चिता परिस्थितिः सञ्जाता। तत्र भारतीयजनतापक्षतः केवलं द्वात्रिंशत् स्थानानि, आम-आदमी-पार्टीपक्षतः अष्टाविंशतिः स्थानानि, काङ्ग्रेसपक्षतोऽष्टौ स्थानानि एवं प्राप्तवन्तः। एतादृश्यां स्थितौ देहल्यां कीदृशः सर्वकारो भविष्यतीति निश्चितं नास्ति। पक्षत्रयस्यापि प्रमुखाध्यक्षाः उपराज्यपालेन सह मिलित्वा स्वपक्षं स्थापितवन्तः यत् ते स्थिरसर्वकारं दातुम् असमर्थाः, अत एव राष्ट्रपतिशासनस्य सम्भावना प्राबल्येन दृश्यते।

## वेव्ससंस्थायाः सप्तदशं भारतसम्मेलनम्

- अपर्णाधीरः

**नवदेहली।** आधुनिकसन्दर्भे शिक्षानैतिकतयोः वैदिकचिन्तनम् इति विषये नवम्बरमासस्य द्वाविंशदिनाङ्कात् चतुर्विंशदिनाङ्कं यावत् लखनवुस्थाया अखिलभारतीय-संस्कृतपरिषदः तत्त्वावधाने लखनवुस्थदेववाणीभवने वेव्ससंस्थायाः सप्तदशं राष्ट्रियसम्मेलनम् आयोजितम्।

सम्मेलनेऽस्मिन् भारतस्य पाण्डेचेरी-आन्ध्रप्रदेश-असम-उत्तराखण्ड-हिमाचल-पश्चिमबङ्ग-पञ्चनद-उत्तराखण्ड-हरियाणा-देहलीप्रभृतिप्रान्तेभ्यः प्रायः षष्ट्यधिकैकशतं संस्कृतक्षेत्र-सम्बद्धविद्वद्भिः छात्रैश्च भागो

(शेषभागो द्वितीयपुटे)



## देहल्याः देववाणीपरिषदोऽष्टात्रिंशत्तमः स्थापनादिवससमारोहः

- सुनीलजोशी

**नवदेहली।** देववाणी-परिषद्, देहली इत्यस्याः संस्थाया अष्टात्रिंशत्तमः स्थापनादिवससमारोहः 13.12.2013 तमे दिनाङ्के, 'रमालयः, आर् 6 वाणीविहारः, उत्तमनगरम्, नवदेहली' इति स्थाने महता समुल्लासेन सम्मानितोऽभूत्। आचार्यरामकरणशर्मणां मुख्यातिथित्वे समायोजितेऽस्मिन् समारोहे काव्यपाठः, अक्षरश्लोकम् , साहित्यचर्चा इत्यादयः कार्यक्रमाः समायोजिताः, यत्र विद्वद्भिः छात्रैश्च सहभागिता कृता। परिषदो महासचिवेन डॉ. रमाकान्तशुक्लेन श्री आशुकवि-सार्वभौमविल्लूर-नडादूर-श्रीनिधिराघवाचार्यप्रणीतस्य वसुमतीशतकस्य सोपज्ञा 'रमा' नाम्नि टीका अंशतः श्राविता। संयोगतोऽस्मिन्नेव दिने गीताजयन्त्यप्यासीत्। आचार्यरामकरण-शर्मणा श्रीमद्भगवद्गीतायाः महत्त्वं प्रतिपादयतोक्तं यद् गीतायां कर्मज्ञानभक्तीनां त्रिवेणी मानवजीवनस्य उत्कर्षार्थमुदारतया प्रवहति। संस्कृतभाषायाः महत्त्वं प्रकटयता तेनोक्तं यत्

(शेषभागो द्वितीयपुटे)






## अक्षरश्लोकप्रतियोगितायाः समायोजनम्

- लक्ष्मीशर्मा।

**नवदेहली।** देहलीसंस्कृताकादम्या (देहली-सर्वकारेण) नवदेहलीस्थ-दरियागञ्जेत्याख्ये स्थले स्थिते शारदादेवीसंस्कृतमहाविद्यालये 09.12.2013तमे दिनाङ्के अक्षरश्लोकप्रतिस्पर्धा समायोजिता। समायोजितायामस्यां प्रतियोगितायां नैके संस्कृतविद्यालयमहाविद्यालयच्छात्राः भागम् अगृह्णन्।

कार्यक्रमस्य मुख्यातिथिना देहलीविश्वविद्यालयस्य संस्कृतविभागाध्यक्षेण प्रो.रमेशभारद्वाजमहाभागेन प्रोक्तं यत् संस्कृतभाषायाः शब्दक्षमता अद्वितीया विशाला चास्ति। संस्कृते एकस्यैव शब्दस्य कृते बहवः शब्दाः प्रयुज्यन्ते एवं प्रत्येकं शब्दस्य भिन्नाः भिन्ना अर्थाश्च भवन्ति। अस्याः भाषायाः सहजता सरलता च नान्यस्यां भाषायां प्राप्यते।

(शेषभागः अन्तिमपुटे)



## वाराणस्यां सभाजिताः संस्कृतविद्वांसः

-डॉ. सुलोचनामिश्रा

अक्टूबरमासस्य सप्तविंशे दिनाङ्के वाराणस्यां महरूवगञ्जस्थे माहेश्वरीभवने भारतीयसंस्कृतिसभ्यतयोः भारतीयवैदुष्यपरम्परायाञ्च योगदानं ददतां विदुषां सम्माननम् अभूत्। तत्र हि उत्तरप्रदेश-बिहार-उज्जयिनी-शिमला-जयपुर-देहलीप्रभृतिभ्यः प्रान्तेभ्यः समागतैः विद्वद्भिः भारतीय-विद्यासन्दर्भे बहूनि तथ्यानि स्पष्टीकृतानि। अखिलभारतीय-विद्वत्परिषदोऽध्यक्षः प्रो. जयशङ्करलालत्रिपाठी न्यगादीद् यद् देशे पततः शोधस्तरस्य कृते न केवलं शोधकर्तार उत्तरदायिनोऽपि तु व्यवस्थाऽपि तत्र कारणम्।

(शेषभागो द्वितीयपुटे)



(प्रथमपुटस्य शेषभागः)

# वेव्ससंस्थायाः सप्तदशं भारतसम्मेलनम्...........

गृहीतः। सम्मेलनस्योद्घाटनं वैदिकपाठेन सह रेनूपन्त-महोदयायाः निर्देशने लखनवुस्थमहिलामहाविद्यालयस्य छात्राभिः कृतया सुमधुरसरस्वतीवन्दनया तथा वैदिक-मङ्गलाचरणेन चाभूत्। उद्घाटनसत्रे वेव्ससंस्थायाः महासचिवेन प्रो. शशितिवारीवर्यया सभायां समुपस्थितानां विदुषाम् अतिथीनां तथा सम्मेलनस्य मुख्यविषयस्य संक्षिप्तपरिचयः प्रदत्तः। तत्पश्चाद् अखिलभारतीयसंस्कृतपरिषद उपाध्यक्षेण प्रो. अशोककुमार- कालियामहोदयेन स्वागतभाषणेऽखिल-भारतीयसंस्कृतपरिषदो गतिविधयः स्पष्टीकृताः।

उद्घाटनसत्रस्य मुख्यातिथिना राजस्थानसंस्कृत-विश्वविद्यालयस्य पूर्वकुलपतिना प्रो. सत्यदेवमिश्रेण तैत्तिरीयोपनिषदो महत्त्वं प्रकाशयता शिक्षायाः परिभाषा इत्थं वर्णिता- सततं शिक्षणस्य इच्छा शिक्षेति। समारोहेऽस्मिन् प्रसिद्धगणितज्ञः तथा वेव्ससंस्थाया अध्यक्षः प्रो. भूदेवशर्मा अभाणीद् यद् गणितसंस्कृताभ्याम् उभाभ्यामेव सूत्ररूपेण शिक्षणमेव शिक्षेति परिभाषितम्।

उद्घाटनसत्रेऽस्मिन् प्रो. अर्कनाथचौधरी-प्रो. राधेश्यामत्रिपाठी-डॉ. धर्मा-डॉ. भास्करनाथभट्टाचार्या इत्येते विशिष्टातिथित्वेन विराजमाना आसन्। तत्र अर्कनाथचौधरीवर्येण पुरुषार्थचतुष्टयरूपलक्ष्यपूर्त्यर्थम् ईशावास्योपनिषदो महत्त्वं प्रतिपादितम्। वैज्ञानिकेन श्रीराधेश्यामत्रिपाठिना ज्ञानमेव वास्तविकी शक्तिरिति स्पष्टयता संस्कृतं ज्ञानागारमिति स्पष्टीकृतम्। एवमेव कलकत्ताप्रान्ताद् आगतेन रवीन्द्रभारती-विश्वविद्यालयस्य वेदविभागाध्यक्षेण डॉ. भास्करनाथ-भट्टाचार्येण शिक्षा-नैतिकतयोः सम्बन्धः प्रकाशितः। नैतिकता हि मानवतां शिक्षयति तथा पशुभावनां दूरीकरोति।

सम्मेलनेऽस्मिन् प्रायः शतं शोधपत्राणि प्रस्तुतानि, येषु कानिचन विशिष्टव्याख्यानान्यासन्। एवं हि दशसु शैक्षणिकसत्रेषु सम्मेलनस्यास्य विधिवत् सञ्चालनं प्रबुद्धविद्वद्भिः सम्पादितम्।

24/11/2013तमे दिनाङ्के सम्मेलनस्य समापनसत्रस्य आयोजनमभूत्। तत्र हि मुख्यवक्त्रा प्रो. धर्मेन्द्रकुमारशास्त्रिणा प्रोक्तं यत् शारीरिक-मानसिकाध्यात्मिकविकासैः सम्भवति सर्वोन्नतिः। अत एतदुद्देश्येनैव विद्या सर्वविधदुःखानां विमोचिकेति प्रोक्ता।

समापनसत्रमिदं श्रीजितेन्द्रकुमारत्रिपाठी (अखिलभारतीय-संस्कृतपरिषदः सचिवः), प्रो. लल्लनप्रसादः ( वेव्ससंस्थाया उपाध्यक्षः), श्री सी.एम.सिंहः, डॉ. टी. गणेशनवर्यः, प्रो. व्रजेशकुमारशुक्लः, प्रो. रमेशचन्द्र-त्रिपाठी(अखिलभारतीयसंस्कृतपरिषदोऽध्यक्षः) इत्येतेषाम् अतिथीनां समुपस्थितौ सम्पन्नमभूत्।

अवसरेऽस्मिन् डॉ.धर्माद्वारा आत्मनः मातुः पुण्यस्मृतौ प्रतिभावत्सु युवसु सप्त शोधपत्रवाचकाः युवानः स्व. श्रीमतीचन्द्रावतीशर्मस्मृतिपुरस्कारेण पुरस्कृताः।

# देहल्याः देववाणीपरिषदोऽष्टात्रिंशत्तमः स्थापनादिवससमारोहः ..............................

(प्रथमपुटस्य शेषभागः)

पूर्वमांग्लैरुक्तमासीत् यत्संस्कृतभाषा पण्डितानामेव वाक् परं यदा सत्यं ज्ञातं तदा तैः विश्वभाषासु इयं प्रतिष्ठापिता। विश्वभाषासम्बन्धमाध्यमेनेयं परिशीलिता। पण्डितरामजीलाल-पालीवालवेदवेदाङ्गविद्यालयस्य श्रीयुगलकिशोरशर्म-मनोजशर्म-आशीषतिवारी-हितेषशर्म-प्रवीणकुमारशर्मभिः यजुर्वेदसंहितायाः द्वयोरध्याययोरविकलपाठः कृतः। एते सर्वेऽपि वेदपाठिन ऊर्णावस्त्रसमर्पणेन परिषत्पक्षतोऽभिनन्दिता अभूवन्। श्रीसुनीलजोशी एम. ए. संस्कृतपरीक्षासमुत्तरणात्प्रागेव 'नेट'परीक्षोत्तरणार्थम् अभिनन्दितोऽभूत्। इन्द्रप्रस्थमहा-विद्यालयस्य रितिकापाल-भवनाध्यानी-रुचिकोपाध्याय-आकाङ्क्षापाञ्चालादिभिः श्लोकपाठः कृतः। योगेशशर्मणा भर्तृहरेः वाक्यपदीयस्य साधनसमुद्देशमवलम्ब्य अभिभाषितम्। केशवजोशी स्वीयसहयोगिभिः सह 'भाति मे भारतम्' इत्येतत्काव्यस्य सामूहिकगानं प्रस्तुतवान्। डॉ. अजयकुमार-मिश्रः, देववाणी-परिषदः कार्यकलापान् अवलम्ब्य वक्तव्यम् अदात्। माधवप्रसादबोस्ती, सुनीलजोशी, विपिनद्विवेदी, हेमन्तजोशी अन्ये च युवानो विद्वांसोऽक्षरश्लोकैः सहभागितां निरवहन्। श्रीशुभम् आर्येण वाद्यसङ्गीतं प्रस्तुतम्। ऋषिराज-पाठकेन शास्त्रीयगायनं प्रस्तूय रसधारा प्रवाहिता। तेन कार्यक्रमस्य सञ्चालनमपि कृतम्। समारोहस्याध्यक्ष्यं परिषद उपाध्यक्षया श्रीमत्या रमाशुक्लया निर्व्यूढम्। अस्मिन्नवसरे परिषत्प्रकाशितं साहित्यमथितिभ्य उपाहृतमभूत् तथा च दृश्य-श्रव्याङ्कितानां कार्यक्रमाणां प्रस्तुतिरपि सञ्जाता।

# वाराणस्यां सभाजिताः संस्कृतविद्वांसः .........

(प्रथमपुटस्य शेषभागः)

ततः परम् अखिलभारतीयविद्वत्परिषदो राष्ट्रिय-संयोजकेन प्रो. कामेश्वरोपाध्यायेन कथितं यद् ज्यौतिषविद्यायां सप्तमेघानां यद् वर्णनं वर्तते, तद्धि कृषिविज्ञानदृष्ट्या पर्यावरणदृष्ट्या च महत्त्व बिभर्ति। उक्तञ्च- यो हि मेघः कृष्णो भवति, तद्धि सामान्यतो न वर्षतीत्यादि। एवमेव भारतीयसंस्कृतिदर्शनयोः चिन्तने समर्पितजीवनो भारतीय-सर्वकारस्य भूतपूर्ववैज्ञानिकपरामर्शदाता प्रो. ओमप्रकाश-पाण्डेयः, पद्मश्रीसत्यव्रतशास्त्रिवर्यः, रामकथावाचकः श्रीसुमनभाईवर्यश्चैतेऽपि सभामेतां समुद्बोधितवन्तः।

गुजरातप्रान्ताद् आगतेन प्रो. जयनारायणद्विवेदिना समाश्वासितं यत् साम्प्रतं युववर्गः समीचीनकार्याणि प्रतिपादयति।

एतदनन्तरं काव्यशास्त्रे कृतभूरिपरिश्रमः डॉ. अजयकुमारमिश्रः युवप्रतिभासम्मानेन सभाजितः। तेन प्रोक्तं यद् भारतीयविद्वत्परिषदो विस्तारः आवश्यकः।

ततश्च बिहारसंस्कृतपरिषदोऽध्यक्षेण श्रीसिद्धेश्वर-प्रसादेन भणितं यत् साम्प्रतं बिहारप्रान्ते संस्कृतस्य स्थितिः सम्यग्गेवास्ति परन्तु ततोऽपि सुदृढा स्थितिः दक्षिण-भारतेऽवलोक्यते। राजस्थानसंस्कृताकादम्याः अध्यक्षया सुषमासिन्धवीवर्ययाऽपि मानवमूल्यप्रधानशोधकार्यार्थं बलं दत्तम्। एवमेव सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य विद्वद्भिरपि भारतीयपरम्पराया महत्त्वं प्रकाशितम्। समारोहेऽस्मिन् देहलीस्थस्य श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य कुलपतिना प्रो. भवेन्द्रझावर्येण मिथिलायाः प्राचीनयोगदानानाम् उल्लेखः कृतः।

# श्रीशङ्करशिक्षायतने समायोजिता सङ्गोष्ठी

**-प्रतीकदत्तः**

नवदेहली। नवदेहलीस्थश्रीशङ्करशिक्षायतनेन 29. 11.2013तमे दिनाङ्के वसन्तविहारे मासिकसङ्गोष्ठी समायोजिता। यत्र नवदेहलीस्थश्रीलालबहादुरशास्त्रि-राष्ट्रियसंस्कृतविद्यापीठस्य न्यायविभागस्य सहायकाचार्यः डॉ. महानन्दझाः पण्डितमधुसूदनओझाप्रणीतस्य संशय-तदुच्छेदवादग्रन्थमवलम्ब्य व्याख्यानमकरोत्। डॉ.झामहाभागस्य व्याख्यानम् अवलम्ब्य डॉ.रामानुजोपाध्यायः, डॉ. रामराजोपाध्यायः, डॉ.मार्कण्डेयतिवारी तथा च आचार्यसन्तोषकुमारशुक्लः चर्चां कृतवन्तः। सङ्गोष्ठ्या आध्यक्ष्यं आचार्यरमाकान्तशुक्लेन विहितम्। डॉ. रामानुजोपाध्यायः कार्यक्रमे मङ्गलाचरणं समाचरितवान्। श्रीप्रतीकदत्तः, श्रीअनिरुद्धकरः, श्रीशङ्करशिक्षायतनस्य न्यासी श्रीरेणुकामिश्रा तथा अन्ये विद्वासः समारोहेऽस्मिन् समुपातिष्ठन्।

## 'नववर्षस्य शुभावसरे हास्ययोगस्य कार्यशाला'

योगपरम्परायाः प्रचारप्रसारयोरग्रेसराया नवदेहल्याः अशोकविहारस्थाने स्थितस्य वैलनेसकेयरयोगसंस्थानस्य हास्ययोगकार्यशाला दिसम्बरमासस्यान्तिमदिवसे नववर्षस्य पूर्वसन्ध्यायाम् आयोजयिष्यते। योगसंस्थानस्य सञ्चालकः डॉ. राजेशेनोक्तं यद् अस्माकं संस्कृतौ हास्ययोगस्य विशिष्टमहत्त्वं वर्तते। हास्ययोगेन शारीरिक-मानसिक-रोगाः समूलमेव विनाश्यन्ते। अतः 'संस्कृतसंवादस्य' पाठकाः प्रार्थ्यन्ते यत् कार्यशालायां समागत्य अस्य शुभावसरस्य लाभः प्राप्नुवन्त्विति। कार्यक्रमस्य विस्तृतसूचनार्थं सम्पर्कसूत्रमस्ति- 9266481159 इति।

**समेभ्यः पाठकवृन्देभ्यः**
**संस्कृतसंवादपक्षतः**
**ईसवीयनूतनवर्षस्य**
**हार्दाः शुभाशयाः।**
**-संस्कृतसंवादपरिवारः**

**समेभ्यः पाठकवृन्देभ्यः**
**श्रीनिवाससंस्कृतविद्यापीठपक्षतः**
**ईसवीयनूतनवर्षस्य**
**हार्दाः शुभाशयाः।**
- **श्रीनिवाससंस्कृतविद्यापीठम्**, 174,
**रामानुजमार्गः, इब्राहिमपुरम्, देहली**-110036